श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीनयिनाराचार्य विरचिता

# ॥ वेदान्तदेशिक प्रपत्तिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ वेदान्तदेशिक प्रपत्तिः ॥

श्रीमल्लक्ष्मण योगीन्द्र सिद्धान्त विजयध्वजम्।
विश्वामित्र कुलोद्भूतं वरदार्यमहं भजे॥

विद्वन्मतङ्गजशिखाभरणायमानौ
    विश्वातिशायिमहिमाम्बुनिधानभूतौ।
विद्वेषिवादिमुकुटीकृतकुट्टनौ तौ
    वेदान्तसूरिचरणौ शरणं प्रपद्ये॥ १ ॥

विश्वम्भरामतितरामपि भावयन्तौ
    विन्यासतो विविधसज्जनतानुभाव्यौ।
विस्तारसंसृतिमहार्णवकर्णधारौ
    वेदान्तसूरिचरणौ शरणं प्रपद्ये॥ २ ॥

विश्वान्तरान्धतमसक्षपणप्रवीणौ
    विद्योतमान नखरेन्दुमयूखजालैः।
विख्याततामरसशङ्खरथाङ्गचिह्नौ
    वेदान्तसूरिचरणौ शरणं प्रपद्ये॥ ३ ॥

विद्वेषमानमदमत्सरविद्विषौ यौ
    विष्ण्वालयानुगमनोत्तमनित्यकृत्यौ।
वेदान्तवृद्धविहिताञ्जलिगोचरौ तौ
    वेदान्तसूरिचरणौ शरणं प्रपद्ये॥ ४ ॥

विष्ण्वर्पितात्मजनभाग्यविपाकभूतौ
    विभ्राजमाननवकोकनदानुकल्पौ।

www.prapatti.com

वेषान्तरोपगतपल्लवतल्लजौ तौ
वेदान्तसूरिचरणौ शरणं प्रपद्ये॥ ५॥

वेधोमुखैरपि सुरैर्विहितप्रणामौ
वेलातिलङ्घिसुषमासुकुमारभावौ।
विस्मेरकेसरलसन्मृदुलाङ्गुलीकौ
वेदान्तसूरिचरणौ शरणं प्रपद्ये॥ ६॥

विद्रावितोद्भटविकाररजोगुणौ तौ
विख्यातभूरिविभवेन रजःकणेन।
विश्वोपकारकरणाय कृतावतारौ
वेदान्तसूरिचरणौ शरणं प्रपद्ये॥ ७॥

विष्वङ्घ्रिनिर्गतसरित्प्रवरानुभाव्यौ
विद्याविनीतजनितैर्विमलैस्स्वतीर्थैः।
व्यानम्रशिष्यजनरक्षणजागरूकौ
वेदान्तसूरिचरणौ शरणं प्रपद्ये॥ ८॥

वीथीषु रङ्गनगरे कृतचङ्क्रमौ तौ
विष्णूत्सवेषु विधिवासवसेवितेषु।
विद्याविनीतजनताविहितानुसारौ
वेदान्तसूरिचरणौ शरणं प्रपद्ये॥ ९॥

विश्वासविष्णुपदभक्तिविरक्तिशून्यं
विभ्रष्टकृत्यमपि मां विषयेषु सक्तम्।
विद्वत्सभानुगतियोग्यमिहादधानौ
वेदान्तसूरिचरणौ शरणं प्रपद्ये॥ १०॥

॥ इति वेदान्तदेशिक प्रपत्तिः समाप्ता ॥

www.prapatti.com